कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥अथ द्वितीय काण्डे प्रथमः प्रश्नः॥

हरिः ओम्॥ वायव्यग्ग् श्वेतमा लभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोप धावति स एवैनं भूतिं गमयति भवत्येवाऽतिक्षिप्रा देवतेत्याहुः सैनमीश्वरा प्रदह इत्येतमेव सन्तं वायवे नियुत्वत आ लभेत नियुद्वा अस्य धृतिर्धृत एव भूतिमुपैत्यप्रदाहाय भवत्येव [१] वायवे नियुत्वत आ लभेत ग्रामकामो वायुर्वा इमाः प्रजा नस्योता नेनीयते वायुमेव नियुत्वन्तग्ग् स्वेन भागधेयेनोप धावति स एवाऽस्मै प्रजानः स्योता नि यच्छति ग्राम्येव भवति नियुत्वते भवति ध्रुवा एवाऽस्मा अनपगाः करोति वायवे नि युत्वत आ लभेत प्रजाकामः प्राणो वै वायुरपानो नियुत्प्राणापानौ खलु वा एतस्य प्रजाया [२] अप क्रामतो योऽलं प्रजायै सन्प्रजां न विन्दते वायुमेव नियुत्वन्तग्ग् स्वेन भागधेयेनोप धावति स एवाऽस्मै प्राणापानाभ्यां प्रजां प्र जनयति विन्दते प्रजां वायवे नियुत्वत आ लभेत ज्योगामयावी प्राणो वै वायुरपानो नियुत्प्राणापानौ खलु वा एतस्मादपक्रामतो यस्य ज्योगामयति वायुमेव नियुत्वन्तग्ग् स्वेन भागधेयेनोप [३] धावति स एवाऽस्मिन् प्राणापानौ दधात्युत यदीतासुर्भवति जीवत्येव प्रजापतिर्वा इदमेक आसीथ्सोऽकामयत प्रजाः पशून्थ्सृजेयेति स आत्मनो वपामुदक्खिदत्तामग्नौ प्राऽगृह्णात्ततोऽजस्तूपरः समभवत्तग्ग् स्वायै देवताया आऽलभत ततो वै स प्रजाः पशूनसृजत यः प्रजाकामः [४] पशुकामः स्याथ्स एतं प्राजापत्यमजं तूपरमा लभेत प्रजापतिमेव

स्वेन भागधेयेनोप धावति स एवाऽस्मै प्रजां पशून् प्र जनयति यच्छमश्रुणस्तत्पुरुषाणाग्ं रूपं यत्तूपरस्तदश्वानां यदन्यतोदन्तद्गवां यदव्या इव शफास्तदवीनां यदजस्तदजानामेतावन्तो वै ग्राम्याः पशवस्ता- [५] न्नूपेणैवाऽव रुन्धे सोमापौष्णं त्रैतमा लभेत पशुकामो द्वौ वा अजायै स्तनौ नानैव द्वावभि जायेते ऊर्जं पुष्टिं तृतीयः सोमापूषणावेव स्वेन भागधेयेनोप धावति तावेवाऽस्मै पशून् प्र जनयतः सोमो वै रेतोधाः पूषा पशूनां प्रजनयिता सोम एवाऽस्मै रेतो दधाति पूषा पशून् प्र जनयत्यौदुम्बरो यूपो भवत्यूर्ग्वा उदुम्बर ऊर्क्पशव ऊर्जैवाऽस्मा ऊर्जं पशूनव रुन्धे॥[६]

अप्रदाहाय भवत्येव प्रजाया आमयति वायुमेव नियुत्वन्तग्ग् स्वेन भागधेयेनोप प्रजाकाम-स्तान् यूपस्त्रयोदश च ||2.1.1||

प्रजापतिः प्रजा असृजत ता अस्माथ्सृष्टाः पराचीरायन्ता वरुणमगच्छन्ता अन्वैत्ताः पुनरयाचत ता अस्मै न पुनरददाथ्सोऽब्रवीद्वरं वृणीष्वाऽथ मे पुनर्देहीति तासां वरमाऽलभत स कृष्ण एकशितिपादभवद्यो वरुणगृहीतः स्याथ्स एतं वारुणं कृष्णमेकशितिपादमा लभेत वरुण- [७] मेव स्वेन भागधेयेनोप धावति स एवैनं वरुणपाशान्मुञ्चति कृष्ण एकशितिपाद्भवति वारुणो ह्येष देवतया समृद्ध्यै सुवर्भानुरासुरः सूर्यं तमसाऽविध्यत्तस्मै देवाः प्रायश्चित्तिमैच्छन्तस्य यत्प्रथमं तमोऽपाघ्नन्थ्सा कृष्णाऽविरभवद्यद्द्वितीयग्ं सा फल्गुनी यत्तृतीयग्ं सा बलक्षी यदध्यस्थादपाकृन्तन्थ्साऽविर्वशा [८] समभवत्ते देवा अब्रुवन्देवपशुर्वा अयग्ं समभूत्कस्मा इममा लप्स्यामह इत्यथ वै तर्ह्यल्पा पृथिव्यासीदजाता

ओषधयस्तामविं वशामादित्येभ्यः कामायाऽऽलभन्त ततो वा अप्रथत पृथिव्यजायन्तौषधयो यः कामयेत प्रथेय पशुभिः प्र प्रजया जायेयेति स एतामविं वशामादित्येभ्यः कामाया- [९] ऽऽलभेतादित्या नेव कामग्ग् स्वेन भागधेयेनोप धावति त एवैनं प्रथयन्ति पशुभिः प्र प्रजया जनयन्त्यसावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन्तस्मा एता मल्हा आऽलभन्ताऽऽग्नेयीं कृष्णग्रीवीग्ग् सग्ंहितामैन्द्रीग् श्वेतां बार्हस्पत्यां ताभिरेवाऽस्मिन्नुचमदधुर्यो ब्रह्मवर्चसकामः स्यात्तस्मा एता मल्हा आ लभेता- [१०] ऽऽग्नेयीं कृष्णग्रीवीग्ग् सग्ंहितामैन्द्रीग् श्वेतां बार्हस्पत्यामेता एव देवताः स्वेन भागधेयेनोप धावति ता एवाऽस्मिन् ब्रह्मवर्चसं दधति ब्रह्मवर्चस्येव भवति वसन्ता प्रातराग्नेयीं कृष्णग्रीवीमा लभेत ग्रीष्मे मध्यन्दिने सग्ंहितामैन्द्रीग्ग् शरद्यपराह्णे श्वेतां बार्हस्पत्यां त्रीणि वा आदित्यस्य तेजाग्ंसि वसन्ता प्रातर्ग्रीष्मे मध्यन्दिने शरद्यपराह्णे यावन्त्येव तेजाग्ंसि तान्येवा- [११] ऽव रुन्धे संवथ्सरं पर्यालभ्यन्ते संवथ्सरो वै ब्रह्मवर्चसस्य प्रदाता संवथ्सर एवाऽस्मै ब्रह्मवर्चसं प्र यच्छति ब्रह्मवर्चस्येव भवति गर्भिणयो भवन्तीन्द्रियं वै गर्भ इन्द्रियमेवाऽस्मिन्दधति सारस्वतीं मेषीमा लभेत य ईश्वरो वाचो वदितोः सन्वाचं न वदेद्वाग्वै सरस्वती सरस्वतीमेव स्वेन भागधेयेनोप धावति सैवाऽस्मि- [१२] न्वाचं दधाति प्रवदिता वाचो भवत्यपन्नदती भवति तस्मान्मनुष्याः सर्वां वाचं वदन्त्याग्नेयं कृष्णग्रीवमा लभेत सौम्यं बभ्रुं ज्योगामयाव्यग्निं वा एतऽस्य शरीरं गच्छति सोमग्ं रसो यस्य ज्योगामयत्यग्नेरेवाऽस्य शरीरं निष्क्रीणाति सोमाद्रसमुत यदीतासुर्भवति जीवत्येव सौम्यं बभ्रुमा लभेताऽऽग्नेयं कृष्णग्रीवं प्रजाकामः सोमो [१३] वै रेतोधा अग्निः प्रजानां प्रजनयिता सोम एवाऽस्मै रेतो दधात्यग्निः प्रजां प्र

जनयति विन्दते प्रजामाग्नेयं कृष्णग्रीवमा लभेत सौम्यं बभ्रुं यो ब्राह्मणो विद्यामनूच्य न विरोचेत यदाग्नेयो भवति तेज एवाऽस्मिन्तेन दधाति यथ्सौम्यो ब्रह्मवर्चसं तेन कृष्णग्रीव आग्नेयो भवति तम एवाऽस्मादप हन्ति श्वेतो भवति[१४] रुचमेवाऽस्मिन्दधाति बभ्रुः सौम्यो भवति ब्रह्मवर्चसमेवाऽस्मिन्त्विषिं दधात्याग्नेयं कृष्णग्रीवमा लभेत सौम्यं बभ्रुमाग्नेयं कृष्णग्रीवं पुरोधायाग् स्पर्धमान आग्नेयो वै ब्राह्मणः सौम्यो राजन्योऽभितः सौम्यमाग्नेयौ भवतस्तेजसैव ब्रह्मणोभयतो राष्ट्रं परि गृह्णात्येकधा समावृङ्क्ते पुर एनं दधते॥[१५]

लभेत वरुणं वशौतामविं वशामादित्येभ्यः कामाय मल्हा आ लभेत तान्येव सैवाऽस्मिन्थ्सोमः श्वेतोभवति त्रिचत्वारिग्ं शच्च ||**2.1.2**||

देवासुरा एषु लोकेष्वस्पर्धन्त स एतं विष्णुर्वामनमपश्यत्तग्ग् स्वायै देवताया आऽलभत ततो वै स इमान्लोकानभ्यजयद्वैष्णवं वामनमा लभेत स्पर्धमानो विष्णुरेव भूत्वेमान्लोकानभि जयति विषम आ लभेत विषमा इव हीमे लोकाः समृद्ध्या इन्द्राय मन्युमते मनस्वते ललामं प्राशृङ्गमा लभेत संग्रामे [१६] संयत्त इन्द्रियेण वै मन्युना मनसा संग्रामं जयतीन्द्रमेव मन्युमन्तं मनस्वन्तग्ग् स्वेन भागधेयेनोप धावति स एवाऽस्मिन्निन्द्रियं मन्युं मनो दधाति जयति तग्ं संग्राममिन्द्राय मरुत्वते पृश्निसक्थमा लभेत ग्रामकाम इन्द्रमेव मरुत्वन्तग्ग् स्वेन भागधेयेनोप धावति स एवाऽस्मै सजातान् प्र यच्छति ग्राम्येव भवति यदृषभस्तेनै [१७] न्द्रो यत्पृश्निस्तेन मारुतः समृद्ध्यै पश्चात्पृश्निसक्थो भवति पश्चादन्ववसायिनीमेवाऽस्मै विशं करोति सौम्यं बभ्रुमा लभेताऽन्नकामः सौम्यं वा अन्नग्ं सोममेव स्वेन भागधेयेनोप धावति

स एवाऽस्मा अन्नं प्रयच्छत्यन्नाद एव भवति बभ्रुर्भवत्येतद्वा अन्नस्य रूपग्ं समृद्ध्यै सौम्यं बभ्रुमा लभेत यमलग्ं [१८] राज्याय सन्तग्ं राज्यं नोपनमेथ्सौम्यं वै राज्यग्ं सोममेव स्वेन भागधेयेनोप धावति स एवाऽस्मै राज्यं प्र यच्छत्युपैनग्ं राज्यं नमति बभ्रुर्भवत्येतद्वै सोमस्य रूपग्ं समृद्ध्या इन्द्राय वृत्रतुरे ललामं प्राशृङ्गमा लभेत गतश्रीः प्रतिष्ठाकामः पाप्मानमेव वृत्रं तीर्त्वा प्रतिष्ठां गच्छतीन्द्रायाभिमातिघ्ने ललामं प्राशृङ्गमा [१९] लभेत यः पाप्मना गृहीतः स्यात्पाप्मा वा अभिमातिरिन्द्रमेवाऽभिमातिहनग्ग् स्वेन भागधेयेनोप धावति स एवाऽस्मात्पाप्मानमभिमातिं प्र णुदत इन्द्राय वज्रिणे ललामं प्राशृङ्गमा लभेत यमलग्ं राज्याय सन्तग्ं राज्यं नोपनमेदिन्द्रमेव वज्रिणग्ग् स्वेन भागधेयेनोप धावति स एवाऽस्मै वज्रं प्र यच्छति स एनं वज्रो भूत्वा इन्ध उपैनग्ं राज्यं नमति ललामः प्राशृङ्गो भवत्येतद्वै वज्रस्य रूपग्ं समृद्ध्यै॥[२०]

संग्रामे तेनाऽलमभिमातिघ्ने ललामं प्राशृङ्गमैनं पञ्चदश च ||**2.1.3**||

असावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन्तस्मा एतां दशर्ष्भामाऽलभन्त तयैवाऽस्मिन्नुचमदधुर्यो ब्रह्मवर्चसकामः स्यात्तस्मा एतां दशर्ष्भामा लभेताऽमुमेवाऽऽदित्यग्ग् स्वेन भागधेयेनोप धावति स एवाऽस्मिन् ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवति वसन्ता प्रातस्त्रीन्ललामाना लभेत ग्रीष्मे मध्यन्दिने [२१] त्रीञ्छिति पृष्ठाञ्छरद्यपराह्णे त्रीङ्छितिवारान्त्रीणि वा आदित्यस्य तेजाग्ंसि वसन्ता प्रातर्ग्रीष्मे मध्यन्दिने शरद्यपराह्णे यावन्त्येव तेजाग्ंसि तान्येवाऽव रुन्धे त्रयस्त्रय आ लभ्यन्तेऽभिपूर्वमेवाऽस्मिन्तेजो दधाति संवथ्सरं पर्यालभ्यन्ते

संवथ्सरो वै ब्रह्मवर्चसस्य प्रदाता संवथ्सर एवाऽस्मै ब्रह्मवर्चसं प्र यच्छति ब्रह्मवर्चस्येव भवति संवथ्सरस्य परस्तात्प्राजापत्यं कदु [२२] मा लभेत प्रजापतिः सर्वा देवता देवतास्वेव प्रति तिष्ठति यदि बिभीयाद्दुश्चर्मा भविष्यामीति सोमापौष्णग्ग् श्याममा लभेत सौम्यो वै देवतया पुरुषः पौष्णाः पशवः स्वयैवाऽस्मै देवतया पशुभिस्त्वचं करोति न दुश्चर्मा भवति देवाश्च वै यमश्चाऽस्मिन्लोकेऽस्पर्धन्त स यमो देवानामिन्द्रियं वीर्यमयुवत तद्यमस्य [२३] यमत्वं ते देवा अमन्यन्त यमो वा इदमभूद्यद्वयग्ग् स्म इति ते प्रजापतिमुपाऽधावन्थ्स एतौ प्रजापतिरात्मन उक्षवशौ निरमिमीत ते देवा वैष्णावरुणीं वशामाऽलभन्तैन्द्रमुक्षाणं तं वरुणेनैव ग्राहयित्वा विष्णुना यज्ञेन प्राऽणुदन्तैन्द्रेणैवाऽस्येन्द्रियमवृञ्जत यो भ्रातृव्यवान्थ्स्याथ्स स्पर्धमानो वैष्णावरुणीं [२४] वशामा लभेतैन्द्रमुक्षाणं वरुणेनैव भ्रातृव्यं ग्राहयित्वा विष्णुना यज्ञेन प्र णुदत ऐन्द्रेणैवाऽस्येन्द्रियं वृङ्क्ते भवत्यात्मना पराऽऽस्य भ्रातृव्यो भवतीन्द्रो वृत्रमहन्तं वृत्रो हतः षोडशभिर्भोगैरसिनात्तस्य वृत्रस्य शीर्षतो गाव उदायन्ता वैदेह्योऽभवन्तासामृषभो जघनेऽनूदैत्तमिन्द्रो [२५] ऽचायथ्सोऽमन्यत यो वा इममालभेत मुच्येतास्मात्पाप्मन इति स आग्नेयं कृष्णग्रीवमा ऽलभतैन्द्रमृषभं तस्याऽग्निरेव स्वेन भागधेयेनोपसृतः षोडशधा वृत्रस्य भोगानप्यदहदैन्द्रेणेन्द्रियमात्मन्नधत्त यः पाप्मना गृहीतः स्याथ्स आग्नेयं कृष्णग्रीवमा लभेतैन्द्रमृषभमग्निरेवाऽस्य स्वेन भागधेयेनोपसृतः [२६] पाप्मानमपि दहत्यैन्द्रेणेन्द्रियमात्मन्धत्ते मुच्यते पाप्मनो भवत्येव द्यावापृथिव्यां धेनुमा लभेत ज्योगपरुद्धोऽनयोर्हि वा एषोऽप्रतिष्ठितोऽथैष ज्योगपरुद्धो द्यावापृथिवी एव स्वेन भागधेयेनोप धावति ते एवैनं प्रतिष्ठां गमयतः प्रत्येव तिष्ठति पर्यारिणी भवति

पर्यारीव ह्येतस्य राष्ट्रं यो ज्योगपरुद्धः समृद्ध्यै वायव्यं [२७] वथ्समा लभेत वायुर्वा अनयोर्वथ्स इमे वा एतस्मै लोका अपशुष्का विड पशुष्काऽथैष ज्योगपरुद्धो वायुमेव स्वेन भागधेयेनोप धावति स एवाऽस्मा इमान्लोकान् विशं प्र दापयति प्रास्मा इमे लोकाः स्नुवन्ति भुञ्जत्येनं विडुप तिष्ठते॥[२८]

मध्यंदिने कद्रुं यमस्य स्पर्धमानो वैष्णावरुणीं तमिन्द्रोऽस्य स्वेन भागधेयोनोपसृतो वायव्यं द्विचत्वारिग्ंशच्च
||2.1.4||

इन्द्रो वलस्य बिलमपौर्णोथ्सय उत्तमः पशुरासीत्तं पृष्ठं प्रति संगृह्योदक्खिदत्तग्ं सहस्रं पशवोऽनूदायन्थ्स उन्नतोऽभवद्यः पशुकामः स्याथ्स एतमैन्द्रमुन्नतमा लभेतेन्द्रमेव स्वेन भागधेयेनोप धावति स एवाऽस्मै पशून् प्र यच्छति पशुमानेव भवत्युन्नतो [२९] भवति साहस्री वा एषा लक्ष्मी यदुन्नतो लक्ष्मियैव पशूनव रुन्धे यदा सहस्रं पशून् प्राप्नुयादथ वैष्णवं वामनमा लभेतैतस्मिन्वै तथ्सहस्रमध्यतिष्ठत्तस्मादेष वामनः समीषितः पशुभ्य एव प्रजातेभ्यः प्रतिष्ठां दधाति कोऽर्हति सहस्रं पशून् प्राप्तुमित्याहुरहोरात्राण्येव सहस्रग्ं सं पाद्याऽऽलभेत पशवो [३०] वा अहोरात्राणि पशूनेव प्रजातान् प्रतिष्ठां गमयत्योषधीभ्यो वेहतमा लभेत प्रजाकाम ओषधयो वा एतं प्रजायै परि बाधन्ते योऽलं प्रजायै सन् प्रजां न विन्दत ओषधयः खलु वा एतस्यै सूतुमपि घ्नन्ति या वेहद्भवत्योषधीरेव स्वेन भागधेयेनोप धावति ता एवाऽस्मै स्वाद्योनेः प्रजां प्र जनयन्ति विन्दते [३१] प्रजामापो वा ओषधयोऽसत्पुरुष आप एवाऽस्मा असतः सद्ददति तस्मादाहुर्यश्चैवं वेद यश्च नाऽऽपस्त्वावाऽसतः सद्ददतीत्यैन्द्रीग्ं सूतवशामा लभेत भूतिकामोऽजातो वा एष

योऽलं भूत्यै सन् भूतिं न प्राप्नोतीन्द्रं खलु वा एषा सूत्वा वशाऽभव- [३२] दिन्द्रमेव स्वेन भागधेयेनोप धावति स एवैनं भूतिं गमयति भवत्येव यग्ं सूत्वा वशा स्यात्तमैन्द्रमेवाऽऽ लभेतैतद्वाव तदिन्द्रियग्ं साक्षादेवेन्द्रियमव रुन्ध ऐन्द्राग्नं पुनरुथ्सृष्टमा लभेत य आ तृतीयात्पुरुषाथ्सोमं न पिबेद्विच्छिन्नो वा एतस्य सोमपीथो यो ब्राह्मणः सन्ना [३३] तृतीयात्पुरुषाथ्सोमं न पिबतीन्द्राग्नी एव स्वेन भागधेयेनोप धावति तावेवाऽस्मै सोमपीथं प्र यच्छत उपैनग्ं सोमपीथो नमति यदैन्द्रो भवतीन्द्रियं वै सोमपीथ इन्द्रियमेव सोमपीथमव रुन्धे यदाग्नेयो भवत्याग्नेयो वै ब्राह्मणः स्वामेव देवतामनु सं तनोति पुनरुथ्सृष्टो भवति पुनरुथृष्ट इव ह्येतस्य [३४] सोमपीथः समृद्ध्यै ब्राह्मणस्पत्यं तूपरमा लभेताऽभिचरन् ब्रह्मणस्पतिमेव स्वेन भागधेयेनोप धावति तस्मा एवैनमा वृश्चति ताजगार्तिमार्छति तूपरो भवति क्षुरपविर्वा एषा लक्ष्मी यत्तूपरः समृद्ध्यै स्फ्यो यूपो भवति वज्रो वै स्फ्यो वज्रमेवाऽस्मै प्र हरति शरमयं बर्हिः शृणात्येवैनं वैभीदक इध्मो भिनत्त्येवैनम्॥[३५]

भवत्युन्नतः पशवो जनयन्ति विन्दतेऽभवथ्सन्नैतस्येध्मस्त्रीणि च॥2.1.5॥

बार्हस्पत्यग्ं शितिपृष्ठमा लभेत ग्रामकामो यः कामयेत पृष्ठग्ं समानानाग् स्यामिति बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवैनं पृष्ठग्ं समानानां करोति ग्राम्येव भवति शितिपृष्ठो भवति बार्हस्पत्यो ह्येष देवतया समृद्ध्यै पौष्णग्ग् श्याममा लभेताऽन्नकामोऽन्नं वै पूषा पूषणमेव स्वेन भागधेयेनोप धावति स एवाऽस्मा [३६] अन्नं प्र यच्छत्यन्नाद एव भवति श्यामो भवत्येतद्वा अन्नस्य रूपग्ं समृद्ध्यै मारुतं

पृश्निमा लभेताऽन्नकामोऽन्नं वै मरुतो मरुत एव स्वेन भागधेयेनोप धावति त एवाऽस्मा अन्नं प्र यच्छन्त्यन्नाद एव भवति पृश्निर्भवत्येतद्वा अन्नस्य रूपग्ं समृद्ध्या ऐन्द्रमरुणमा लभेतेन्द्रियकाम इन्द्रमेव [३७] स्वेन भागधेयेनोप धावति स एवाऽस्मिन्निन्द्रियं दधातीन्द्रियाव्येव भवत्यरुणो भ्रूमान् भवत्येतद्वा इन्द्रस्य रूपग्ं समृद्ध्यै सावित्रमुपध्वस्तमा लभेत सनिकामः सविता वै प्रसवानामीशे सवितारमेव स्वेन भागधेयेनोप धावति स एवाऽस्मै सनिं प्र सुवति दानकामा अस्मै प्रजा भवन्त्युपध्वस्तो भवति सावित्रो ह्येषः [३८] देवतया समृद्ध्यै वैश्वदेवं बहुरूपमा लभेताऽन्नकामो वैश्वदेवं वा अन्नं विश्वानेव देवान्थ्स्वेन भागधेयेनोप धावति त एवाऽस्मा अन्नं प्र यच्छन्त्यन्नाद एव भवति बहुरूपो भवति बहुरूपग्ग् ह्यन्नग्ं समृद्ध्यै वैश्वदेवं बहुरूपमा लभेत ग्रामकामो वैश्वदेवा वै सजाता विश्वानेव देवान्थ्स्वेन भागधेयेनोप धावति त एवाऽस्मै [३९] सजातान् प्र यच्छन्ति ग्राम्येव भवति बहुरूपो भवति बहुदेवत्यो १ ह्येष समृद्ध्यै प्रजापत्यं तूपरमा लभेत यस्याऽनाज्ञातमिव ज्योगामयेत्प्राजापत्यो वै पुरुषः प्रजापतिः खलु वै तस्य वेद यस्याऽनाज्ञातमिव ज्योगामयति प्रजापतिमेव स्वेन भागधेयेनोप धावति स एवैनं तस्माथ्स्रामान् मुञ्चति तूपरो भवति प्राजापत्यो ह्येष देवतया समृद्ध्यै॥[४०]

अस्मा इन्द्रमेवैष सजाता विश्वानेव देवान्थ्स्वेन भागधेयेनोप धावति त एवाऽस्मै प्राजापत्यो हि त्रीणि च

||2.1.6||

वषट्कारो वै गायत्रियै शिरोऽच्छिनत्तस्यै रसः पराऽपतत्तं बृहस्पतिरुपाऽगृह्णाथ्सा शितिपृष्ठा वशाऽभवद्यो द्वितीयः पराऽपतत्तं मित्रावरुणावुपाऽगृह्णीताग्ं सा द्विरूपा

वशाऽभवद्यस्तृतीयः पराऽपतत्तं विश्वे देवा उपाऽगृह्णन्थ्सा बहुरूपा
वशाऽभवद्यश्चतुर्थः पराऽपतथ्स पृथिवीं प्राऽविशत्तं बृहस्पतिरभ्य- [४१]
गृह्णादस्त्वेवाऽयं भोगायेति स उक्षवशः समभवद्यल्लोहितं पराऽपतत्तद्रुद्र
उपाऽगृह्णाथ्सा रौद्री रोहिणी वशाऽभवद्बार्हस्पत्याग्ं शितिपृष्ठामा लभेत
ब्रह्मवर्चसकामो बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवाऽस्मिन् ब्रह्मवर्चसं
दधाति ब्रह्मवर्चस्येव भवति छन्दसां वा एष रसो यद्वशा रस इव खलु [४२] वै
ब्रह्मवर्चसं छन्दसामेव रसेन रसं ब्रह्मवर्चसमव रुन्धे मैत्रावरुणीं द्विरूपामा लभेत
वृष्टिकामो मैत्रं वा अहर्वारुणी रात्रिरहोरात्राभ्यां खलु वै पर्जन्यो वर्षति
मित्रावरुणावेव स्वेन भागधेयेनोप धावति तावेवाऽस्मा अहोरात्राभ्यां पर्जन्यं
वर्षयतश्छन्दसां वा एष रसो यद्वशा रस इव खलु वै वृष्टिश्छन्दसामेव रसेन [४३]
रसं वृष्टिमव रुन्धे मैत्रावरुणीं द्विरूपामा लभेत प्रजाकामो मैत्रं वा अहर्वारुणी
रात्रिरहोरात्राभ्यां खलु वै प्रजाः प्र जायन्ते मित्रावरुणावेव स्वेन भागधेयेनोप
धावति तावेवाऽस्मा अहोरात्राभ्यां प्रजां प्र जनयतश्छन्दसां वा एष रसो यद्वशा रस
इव खलु वै प्रजा छन्दसामेव रसेन रसं प्रजामव [४४] रुन्धे वैश्वदेवीं बहुरूपामा
लभेतान्नकामो वैश्वदेवं वा अन्नं विश्वानेव देवान्थ्स्वेन भागधेयेनोप धावति त
एवाऽस्मा अन्नं प्र यच्छन्त्यन्नाद एव भवति छन्दसां वा एष रसो यद्वशा रस इव
खलु वा अन्नं छन्दसामेव रसेन रसमन्नमव रुन्धे वैश्वदेवीं बहुरूपामा लभेत
ग्रामकामो वैश्वदेवा वै [४५] सजाता विश्वानेव देवान्थ्स्वेन भागधेयेनोप धावति त
एवाऽस्मै सजातान् प्र यच्छन्ति ग्राम्येव भवति छन्दसां वा एष रसो यद्वशा रस इव
खलु वै सजाताश्छन्दसामेव रसेन रसग्ं सजातानव रुन्धे बार्हस्पत्यमुक्षवशामा

लभेत ब्रह्मवर्चसकामो बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवाऽस्मिन् ब्रह्मवर्चसं [४६] दधाति ब्रह्मवर्चस्येव भवति वशं वा एष चरति यदुक्षा वशा इव खलु वै ब्रह्मवर्चसं वशेनैव वशं ब्रह्मवर्चसमव रुन्धे रौद्रीग्ं रोहिणीमा लभेताऽभिचरन् रुद्रमेव स्वेन भागधेयेनोप धावति तस्मा एवैनमा वृश्चति ताजगार्तिमार्छति रोहिणी भवति रौद्री ह्येषा देवतया समृद्ध्यै स्फ्यो यूपो भवति वज्रो वै स्फ्यो वज्रमेवाऽस्मै प्र हरति शरमयम्बर्हिः शृणात्येवैनं वैभीदक इध्मो भिनत्त्येवैनम्॥[४७]

अभि खलु वृष्टिश्छन्दसामेव रसेन रसं प्रजामव वैश्वदेवा वै ब्रह्मवर्चसं यूप एकान्न विग्ंशतिश्च ||**2.1.7**||

असावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन्तस्मा एताग्ं सौरीग् श्वेतां वशामाऽऽलभन्त तयैवाऽस्मिन्नुचमदधुर्यो ब्रह्मवर्चसकामः स्यात्तस्मा एताग्ं सौरीग् श्वेतां वशामा लभेताऽमुमेवाऽऽदित्यग्ग् स्वेन भागधेयेनोप धावति स एवाऽस्मिन् ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवति बैल्वो यूपो भवत्यसौ [४८] वा आदित्यो यतोऽजायत ततो बिल्व उदतिष्ठथ्सयोन्येव ब्रह्मवर्चसमव रुन्धे ब्राह्मणस्पत्यां बभ्रुकर्णीमा लभेताऽभि चरन्वारुणं दशकपालं पुरस्तान्निर्वपेद्वरुणेनैव भ्रातृव्यं ग्राहयित्वा ब्रह्मणा स्तृणुते बभ्रुकर्णी भवत्येतद्वै ब्रह्मणो रूपग्ं समृद्ध्यै स्फ्यो यूपो भवति वज्रो वै स्फ्यो वज्रमेवाऽस्मै प्र हरति शरमयं बर्हिः शृणा– [४९] त्येवै नं वैभीदक इध्मो भिनत्त्येवैनं वैष्णवं वामनमा लभेत यं यज्ञो नोपनमेद्विष्णुर्वै यज्ञो विष्णुमेव स्वेन भागधेयेनोप धावति स एवाऽस्मै यज्ञं प्र यच्छत्युपैनं यज्ञो नमति वामनो भवति वैष्णवो ह्येष देवतया समृद्ध्यै त्वाष्ट्रं वडबमा लभेत पशुकामस्त्वष्टा

वै पशूनां मिथुनानां [५०] प्रजनयिता त्वष्टारमेव स्वेन भागधेयेनोप धावति स एवाऽस्मै पशून्मिथुनान् प्र जनयति प्रजा हि वा एतस्मिन् पशवः प्रविष्टा अथैष पुमान्थ्सन्वडबः साक्षादेव प्रजां पशूनव रुन्धे मैत्रग्ग् श्वेतमा लभेत संग्रामे संयत्ते समयकामो मित्रमेव स्वेन भागधेयेनोप धावति स एवैनं मित्रेण सं नयति [५१] विशालो भवति व्यवसाययत्येवैनं प्राजापत्यं कृष्णमा लभेत वृष्टिकामः प्रजापतिर्वै वृष्ट्या ईशे प्रजापतिमेव स्वेन भागधेयेनोप धावति स एवाऽस्मै पर्जन्यं वर्षयति कृष्णो भवत्येतद्वै वृष्ट्यै रूपग्ं रूपेणैव वृष्टिमव रुन्धे शबलो भवति विद्युतमेवाऽस्मै जनयित्वा वर्षयत्यवाशृङ्गो भवति वृष्टिमेवाऽस्मै नि यच्छति॥[५२]

असौ शृणाति मिथुनानां नयति यच्छति ||**2.1.8**||

वरुणग्ं सुषुवाणमन्नाद्यं नोपाऽनमथ्स एतां वारुणीं कृष्णां वशामपश्यत्ताग् स्वायै देवताया आऽलभत ततो वै तमन्नाद्यमुपाऽनमद्यमलमन्नाद्याय सन्तमन्नाद्यं नोपनमेथ्स एतां वारुणीं कृष्णां वशामा लभेत वरुणमेव स्वेन भागधेयेनोप धावति स एवाऽस्मा अन्नं प्र यच्छत्यन्नाद [५३] एव भवति कृष्णा भवति वारुणी ह्येषा देवतया समृद्ध्यै मैत्रग्ग् श्वेतमा लभेत वारुणं कृष्णमपां चौषधीनां च संधावन्नकामो मैत्रीर्वा ओषधयो वारुणीरापोऽपां च खलु वा ओषधीनां च रसमुप जीवामो मित्रावरुणावेव स्वेन भागधेयेनोप धावति तावेवाऽस्मा अन्नं प्र यच्छतोऽन्नाद एव भव- [५४] त्यपांचौषधीनां च संधावा लभत उभयस्याऽवरुद्ध्यै विशाखो यूपो भवति द्वे ह्येते देवते समृद्ध्यै मैत्रग्ग् श्वेतमा लभेत वारुणं कृष्णं ज्योगामयावी यन्मैत्रो भवति मित्रेणैवाऽस्मै वरुणग्ं शमयति यद्वारुणः साक्षादेवैनं

वरुणपाशान्मुञ्चत्युत यदीतासुर्भवति जीवत्येव देवा वै पुष्टिं नाऽविन्दन् [५५] तां मिथुनेऽपश्यन्तस्यां न समराधयन्तावश्विनावब्रूतामावयोर्वा एषा मैतस्यां वदध्वमिति साऽश्विनोरेवाऽभवद्यः पुष्टिकामः स्याथ्स एतामाश्विनीं यर्मीं वशामा लभेताऽश्विनावेव स्वेन भागधेयेनोप धावति तावेवाऽस्मिन् पुष्टिं धत्तः पुष्यति प्रजया पशुभिः॥[५६]

अन्नादोऽन्नाद एव भवत्यविन्दन्पञ्चचत्वारिग्ंशच्च **||2.1.9||**

आश्विनं धूम्रललाममा लभेत यो दुर्ब्राह्मणः सोमं पिपासेदश्विनौ वै देवानामसोमपावास्तां तौ पश्चा सोमपीथं प्राऽऽप्नुतामश्विनावेतस्य देवता यो दुर्ब्राह्मणः सोमं पिपासत्यश्विनावेव स्वेन भागधेयेनोप धावति तावेवाऽस्मै सोमपीथं प्र यच्छत उपैनग्ं सोमपीथो नमति यद्धूम्रो भवति धूम्रिमाणमेवाऽस्मादप हन्ति ललामो [५७] भवति मुखत एवाऽस्मिन्तेजो दधाति वायव्यं गोमृगमा लभेत यमजघ्निवाग्ं समभिशग्ं सेयुरपूता वा एतं वागृच्छति यमजघ्निवाग्ं समभिशग्ंसन्ति नैष ग्राम्यः पशुर्नाऽऽरण्यो यद्गोमृगो नेवैष ग्रामे नाऽरण्ये यमजघ्निवाग्ं समभिशग्ंसन्ति वायुर्वै देवानां पवित्रं वायुमेव स्वेन भागधेयेनोप धावति स एवै- [५८] नं पवयति पराची वा एतस्मै व्युच्छन्ती व्युच्छति तमः पाप्मानं प्र विशति यस्याऽऽश्विने शस्यमाने सूर्यो नाऽऽविर्भवति सौर्यं बहुरूपमा लभेताऽमुमेवाऽऽदित्यग्ग् स्वेन भागधेयेनोप धावति स एवाऽस्मात्तमः पाप्मानमप हन्ति प्रतीच्यस्मै व्युच्छन्ती व्युच्छत्यप तमः पाप्मानग्ं हते॥[५९]

ललामः स एव षत्चत्वारिग्ंशच्च **||2.1.10||**

इन्द्रं वो विश्वतस्परीन्द्रं नरो मरुतो यद्ध वो दिवोया वः शर्म॥ भरेष्विन्द्रग्ं सुहवग्ं हवामहेऽग्ंहोमुचग्ं सुकृतं दैव्यं जनम्। अग्निं मित्रं वरुणग्ं सातये भगं द्यावापृथिवी मरुतः स्वस्तये॥ ममत्तु नः परिज्मा वसर्हा ममत्तु वातो अपां वृषण्वान्। शिशीतमिन्द्रापर्वता युवं नस्तन्नो विश्वे वरिवस्यन्तु देवाः॥ प्रिया वो नाम [६०] हुवे तुराणाम्। आ यत्तृपन्मरुतो वावशानाः॥ श्रियसे कं भानुभिः सं मिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः। ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः॥ अग्निः प्रथमो वसुभिर्नो अव्याथ्सोमो रुद्रेभिरभि रक्षतु त्मना। इन्द्रो मरुद्भिर् ऋतुधा कृणोत्वादित्यैर्नो वरुणः सग्ं शिशातु॥ सं नो देवो वसुभिरग्निः सग्ं [६१] सोमस्तनूभी रुद्रियाभिः। समिन्द्रो मरुद्भिर्यज्ञियैः समादित्यैर्नो वरुणो अजिज्ञिपत्॥ यथाऽऽदित्या वसुभिः सम्बभूवुर्मरुद्भी रुद्राः समजानताऽभि। एवा त्रिणामन्नहृणीयमाना विश्वे देवाः समनसो भवन्तु॥ कुत्रा चिद्यस्य समृतौ रण्वा नरो नृषदने। अर्हन्तश्चिद्यमिन्धते संजनयन्ति जन्तवः॥ सं यदिषो वनामहे सग्ं हव्या मानुषाणाम्। उत द्युम्नस्य शवसः [६२] ऋतस्य रश्मिमा ददे॥ यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः। आ वोऽर्वाची सुमतिर्ववृत्यादग्ंहोश्चिद्या वरिवोवित्तराऽसत्॥ शुचिरपः सूयवसा अदब्ध उप क्षेति वृद्धवयाः सुवीरः। नकिष्टं २ घ्नन्त्यन्तितो न दूराद्य आदित्यानां भवति प्रणीतौ॥ धारयन्त आदित्यासो जगथ्स्था देवा विश्वस्य भुवनस्य गोपाः। दीर्घाधियो रक्षमाणा [६३] असुर्यमृतावानश्चयमाना ऋणानि॥ तिस्रो भूमीर्धारयन्त्रीग्ं रुत द्यून्त्रीणि व्रता विदथे अन्तरेषाम्। ऋतेनादित्या महि वो महित्वं तदर्यमन्वरुण मित्र चारु॥ त्यान्नु क्षत्रियाग्ं अव आदित्यान् याचिषामहे। सुमृडीकाग्ं अभिष्टये॥ न दक्षिणा वि

चिकिते न सव्या न प्राचीनमादित्या नोत पश्चा। पाक्या चिद्वसवो धीर्या चि– [६४]
द्युष्मानीतो अभयं ज्योतिरश्याम्॥ आदित्यानामवसा नूतनेन सक्षीमहि शर्मणा
शंतमेन। अनागास्त्वे अदितित्वे तुरास इमं यज्ञं दधतु श्रोषमाणाः॥ इमं मे वरुण
श्रुधी हवमद्या च मृडय। त्वामवस्युरा चके॥ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा
शास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरुशग्ंस मा न आयुः प्र
मोषीः॥[६५]

नामाऽग्निस्सग्ं शवसो रक्षमाणा धीर्या चिदेकान्न पञ्चाशच्च ||**2.1.11**||

*वायव्यं प्रजापतिस्ता वरुणं देवासुरा एष्वसावादित्यो दशर्षभामिन्द्रो वलस्य बार्हस्पत्यं वषट्कारोऽसौ सौरीं
वरुणमाश्विनमिन्द्रं वो नर एकादश* ||**11**||

वायव्यमाग्नेयीं कृष्णग्रीवीमसावादित्यो वा अहोरात्राणि वषट्कारः प्रजनयिता हुवे तुराणां पञ्चषष्टिः ||**65**||
वायव्यां प्रमोषीः॥

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति द्वितीयकाण्डे प्रथमः प्रश्नः॥